# ८ अष्टम दशकः - परमज्ञानोपदेशः

अथाह कृष्णः शृणु चिन्तयाऽलं गृहाश्रमस्ते न च बन्ध कृत्स्यात् ।
बन्धस्य मुक्तेश्च मनो हि हेतुः मनोजयार्थं भज विश्व धात्रीम् ॥ ८-१॥

यस्याः प्रसादे सफलं समस्तं यदप्रसादे विफलं समस्तम् ।
माहात्म्य मस्या विदितं जगत्सु मया कृतं भागवतं शृणु त्वम् ॥ ८-२॥

विष्णु र्जगत्येक समुद्र लीने बालः शयानो वटपत्र एकः ।
स्वबालता हेतु विचार मग्नः शुश्राव काम प्यशरीरि वाचम् ॥ ८-३॥

सनातनं सत्यमहं मदन्यत् सत्यं न च स्यादहमेव सर्वम् ।
श्रुत्वेद मुन्मीलित दृष्टि रेष स्मिताननां त्वां जननीं ददर्श ॥ ८-४॥

चतुर्भुजा शङ्ख गदारि पद्म - धरा कृपाद्यैः सह शक्तिजालैः ।
स्थिता जलोप र्यमलाम्बरा त्वं प्रहृष्ट चित्तं हरिमेव मात्थ ॥ ८-५॥

किं विस्मये नाच्युत विस्मृताऽहं त्वया पराशक्ति महाप्रभावात् ।
सा निर्गुणा वाङ्मनसो रगम्या मां सात्विकीं शक्ति मवेहि लक्ष्मीम् ॥ ८-६॥

श्रुतस्त्वया यस्त्व शरीरि शब्दो हिताय ते देव तया स उक्तः ।
अयं हि सर्व श्रुति शास्त्र सारो मा विस्मरेमं हृदि रक्षणीयम् ॥ ८-७॥

नातः परं ज्ञेय मवेहि किञ्चि त्प्रियोऽसि देव्याः शृणु मे वचस्त्वम् ।
त्वन्नाभि पद्माद्द्रुहिणो भवेत्स कर्ता जगत्पालय तत्समस्तम् ॥ ८-८॥

भ्रूमध्यतः पद्मभवस्य कोपात् रुद्रो भविष्यन् सकलं हरेच्च ।
देवीं सदा संस्मर तेऽस्तु भद्रं एवं निगद्याशु तिरोदधाथ ॥ ८-९॥

हरेरिदं ज्ञान मजस्य लब्धं अजात्सुरर्षेश्च ततो ममापि ।
मया त्विदं विस्तरतः सुतोक्तं यत्सूरयो भागवतं वदन्ति ॥ ८-१०॥

देव्या महत्त्वं खलु वर्ण्यतेऽत्र यद्भक्ति माप्तस्य गृहे न बन्धः ।
यद्भक्ति हीन स्त्वगृहेऽपि बद्धो राजाऽपि मुक्तो जनको गृहस्थः ॥ ८-११॥

विदेहराजं तमवाप्य पृष्ट्वा स्वधर्म शङ्काः परिहृत्य धीरः ।
फलेष्वसक्तः कुरु कर्म तेन कर्मक्षयः स्यात्तव भद्रमस्तु ॥ ८-१२॥

श्रुत्वेति सद्यः शुक आश्रमात्स प्रस्थाय वैदेहपुरं समेत्य ।
प्रत्युद्गतः सर्वजनै र्नृपाय न्यवेदय त्स्वागमनस्य हेतुम् ॥ ८-१३॥

गृहस्थ धर्मस्य महत्त्वं अस्मात् विज्ञाय धीमान् स शुको निवृत्तः ।
पित्राश्रमं प्राप्य सुतां पितृणां व्यासेऽतिहृष्टे गृहिणीं चकार ॥ ८-१४॥

उत्पाद्य पुत्रांश्चतुरः सुतां च गृहस्थ धर्मान् विधिनाऽऽचरन् सः ।
प्रदाय चैनां मुनयेऽणुहाय बभूव काले कृतसर्व कृत्यः ॥ ८-१५॥

हित्वाऽऽश्रमं तातमपीश शैल शृङ्गे तपस्वी सहसोत्पतन् खे ।
बभौ स भास्वा निव तद्वियोग खिन्नं शिवो व्यास मसान्त्वयच्च ॥ ८-१६॥

सर्वत्र शङ्काकुल मेव चित्तं ममेह विक्षिप्त मधीर मार्तम् ।
कर्तव्य मूढोऽस्मि सदा शिवे मां धीरं कुरु त्वं वरदे नमस्ते ॥ ८-१७॥